# मल्लिकाबोधः

जयंत नारळीकर

अस्ति संयुक्तराष्ट्रमण्डले अमेरिकायां न्यू जर्सीजनपदे बास्किंगरिजो नाम ग्रामः। तत्र शिशुशालायां मल्लिकानाम्नी बाला प्रतिदिनं मातामहेन सार्धं शालावसाने स्वगृहमागच्छति। तस्याः पुस्तकानि तथैव अन्यत् शालासाहित्यं मातामहः धारयति परन्तु तस्याः पाटलपुटिकां मल्लिका स्वयमेव वहति। एषा पुटिका मल्लिकायाः परमस्नेहपात्रम्। न कदापि सा तां पुटिकां मातामहं धारणार्थं ददाति।

एकदा तु मल्लिका तु पुनरागमनकाले पुटिकां विना उपस्थिता। मातामहः अपृच्छत् 'कुत्रास्ति ते पाटलपुटिका ? किं त्वया विस्मरणेन शालायां स्वकक्षे परित्यक्ता ?' इति। मल्लिका उवाच, 'अद्य मम परमप्रियमित्रम् इमन्युएलः अयाचत यद् असौ मम पुटिकां स्वपितरं दर्शयितुं इच्छति। तस्य पिता तत्समानां पुटिकां इमन्युएलार्थं आपणात् आनेष्यति। अतः मया सा पुटिका एकदिनं यावत् तस्मै प्रदत्ता' इति।

एतत् श्रुत्वा मातामहः दीर्घं निश्वस्य उवाच, 'नैतत् भद्रं त्वया कृतं यतः

स्वयमेव स्वकीयानि रक्षितव्यानि मल्लिके।<br>
वञ्चितो पुष्पकर्णोऽपि पुरा पादपपालने ॥' इति।

'कथमेतत् ?' अपृच्छत् मल्लिका।

'शृणु' उवाच मातामहः। ...... अस्ति महाराष्ट्रराज्ये पुण्यपत्तने पञ्चवटी नाम लघुग्रामः। तत्र प्रभाकरो नाम निवृत्तो राजसेवकः प्रतिवसति स्म। प्रतिदिनं प्रातःकाले असौ राष्ट्रिय-रासायनिक-प्रयोगशाला-परिसरं भ्रमणार्थम् अगच्छत्। ततः निवर्तयन् असौ पञ्चवटीग्रामवासिभिः दृष्टः स्वकर्णोपरि पुष्पमेकं धारयन् 'किमर्थं असौ वामकर्णे सुवर्णचम्पकपुष्पं धारयति ?' ग्रामस्थाः प्रश्नस्य एतस्य उत्तरं ज्ञातुम् उत्सुकाः आसन्। प्रभाकरस्य परोक्षे ते तं 'पुष्पकर्ण' इति नामधेयेन लक्ष्यीकुर्वन्ति स्म। एकदा प्रभाकरस्य अथवा पुष्पकर्णस्य बालसखा विद्याधरः तस्य गृहम् अभ्यागतः। दीर्घनिद्राम् अनुभूय विलम्बेन उत्थितः सः भ्रमणात् निवृत्तं कर्णे पुष्पं धारयन्तं प्रभाकरम् अपश्यत्

'अतिपृच्छा न कर्तव्या' इति बोधवाक्यं विस्मृत्य सः तमपृच्छत् 'मित्रवर किमर्थं त्वं सुवर्णचम्पकेण स्वकर्णं विशोभयसि ? इति।' पुष्पकर्णः उवाच,

'पुष्पेण स्मारितो सम्यक् अहं पादपरक्षणे।
लोभेन वाटिकाप्रेमी नीतिभ्रष्टोऽभवत् किल॥'

'कथमेतत् ?' विद्याधरः अपृच्छत्। पुष्पकर्णः अवदत्, 'शृणु मे शोकपर्यवसायिनम् अनुभवम्। ......'

गतवर्षे अहम् अमेरिकायात्रार्थं गन्तुकामः आसन्। मम गृहं तालयन्त्रेण बद्ध्वा गन्तव्यम् आसीत्। प्रयाणकाले मया चिन्तितं, 'अयं सुवर्णचम्पकपादपः मया पोचापादपवाटिकायाः आनीतः। पात्रे निधाय वर्धितश्च। कः पुष्पदाने क्षमम् इमं पालयिष्यति मम अनुपस्थितौ' इति। यावदहं चिन्ताग्रस्तः तावन् मम गृहद्वारे परममित्रं सुशीलगुप्तः मे यात्राशुभेच्छां प्रदातुम् आगच्छत्। मां चिन्तामग्नं दृष्ट्वा असौ अपृच्छत्, 'मित्र का ते चिन्ता' इति।

'यावदहम् अमेरिकादेशे वसामि तावत्कालपर्यन्तं अस्य पादपस्य पालनं कः करिष्यति ? इति मे चिन्ता।' अहम् अवदम्।

सुशीलगुप्तः सस्मितं अवदत्, 'अलं चिन्तया। मम गृहे मम वाटिकायां अयं पादपः सुखेन वर्धिष्यति। त्वं जानासि एव यदहं वाटिकाकार्ये निपुणोऽस्मीति।' इति।

तत् श्रुत्वा अहं विगतचिन्तः मम प्रियं सुवर्णचम्पकपादपं सपात्रं सुशीलगुप्ताय अददम्। निश्चिन्तमानसः अहं बहुकालपर्यन्तम् अमेरिकायाम् अवसम्। तत् देशात् निवर्त्य अत्र आगत्य यदा अहं सुशीलगुप्तगृहं गतः तदा स उवाच, 'स्वागतम्। स्वस्त्यस्तु ते अमेरिकातः प्रत्यागतस्य। अत्युत्सुकोऽस्मि ज्ञातुं तवानुभवम्' इति।

'स्वस्थोऽहं भगवत्प्रसादात्। परमोत्सुकोऽस्मि ज्ञातुम् – अपि स्वस्त्यस्ति मे चम्पकपादपस्य ?' अहम् अपृच्छम्।

सुशीलगुप्तस्य वदनं मूढभावेनावृतं यावदसौ अपृच्छत्, 'चम्पकपादपः ? मित्र नाहं जाने किं पादपं त्वं उद्दिश्यसि?' इति। परमचकितोऽहं तं स्मारितवान् यन्मया पालनार्थं मम सुवर्णचम्पकपादपः तस्मै प्रदत्तः आसीत् इति। परन्तु सुशीलगुप्तेन तत् अस्वीकृतम्। असौ उवाच,

'सदोषास्ति ते स्मृतिः। त्वया स्वपादपः पालनार्थम् अन्यस्मै कस्मै अपि दत्तः स्यात् कदापि न मह्यम्' इति।

मया अवगतं यत् अयं मम तथाकथितः सुहृद् कलिना प्रेरितः पादपलोभेन अनृतम् अवलम्बते। मौनं धारयित्वा अहं तस्य गृहात् बहिर्यातः। यावदहं द्वारपथेन अगच्छं तदा मया दृष्टः एकः सुवर्णचम्पकवृक्षः वाटिकासीमापरिसरे। निश्चितं मया यत् स एव मे पादपः अधुना वृक्षरूपेण तिष्ठति इति। अपहृतः खलु मम प्रियः पादपः अनेन असत्यवादिना वृक्षलोभेन।

ततःप्रभृति प्रतिदिनम् अहं सुशीलगुप्तसदनमार्गेण भ्रमणार्थं गच्छामि। तथा च वाटिकातः एकं चम्पकपुष्पम् आहरामि। तं पुष्पं मम कर्णोपरि निधाय भ्रमणं पूर्णं करोमि। तेन पुष्पेण अनुस्मारितोऽस्मि यत् प्रियं स्वकीयं वस्तु मया स्वयमेव रक्षितव्यम्। तत्र परावलम्बनं सर्वथैवानुचितम्' इति।

एतत् श्रुत्वा मल्लिका उवाच, 'आजोबा, प्रतिबोधितास्मि खलु। इतःपरं स्वकीयानि वस्तूनि स्वयमेव रक्षामि' इति।